श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ पुष्पपद्धतिः द्वादशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ पुष्पपद्धतिः द्वादशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शौरेः सञ्चारकालेषु पुष्पवृष्टिर्दिवश्च्युता।
पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम्॥ **12.1** ॥

दैवतं मम जगत्त्रयार्चिता
    दिव्यदम्पतिविहारपादुका।
पाणिपादकमलार्पणात्तयोः
    या भजत्यनुदिनं सभाजनम्॥ **12.2** ॥

तव रङ्गराजमणिपादु ! नतो
    विहितार्हणः सुरसरित्पयसा।
अवतंसचन्द्रकलया गिरिशो
    नवकेतकीदळमिवार्पयति॥ **12.3** ॥

कुसुमेषु समर्पितेषु भक्तैः
    त्वयि रङ्गेशपदावनि ! प्रतीमः।
शठकोपमुनेस्त्वदेकनाम्नः
    सुभगं यत्सुरभित्वमस्य नित्यम्॥ **12.4** ॥

पदे परस्मिन् भुवने विधातुः
    पुण्यैः प्रसूनैः पुळिने सरय्वाः।

मध्ये च पादावनि ! सह्यसिन्धोः
    आसीच्चतुःस्थानमिवार्चनं ते ॥ **12.5** ॥

तवैव रङ्गेश्वरपादरक्षे !
    सौभाग्यमव्याहतमाप्तुकामाः।
सुरद्रुमाणां प्रसवैः सुजातैः
    अभ्यर्चयन्त्यप्सरसो मुहुस्त्वाम् ॥ **12.6** ॥

निवेशितां रङ्गपतेः पदाब्जे
    मन्ये सपर्यां मणिपादरक्षे !।
त्वदर्पणादापतितामपश्यत्
    गाण्डीवधन्वा गिरिशोत्तमाङ्गे ॥ **12.7** ॥

पत्राणि रङ्गनृपतेर्मणिपादरक्षे !
    द्वित्राण्यपि त्वयि समर्प्य विभूतिकामाः।
पर्यायलब्धपुरुहूतपदाः शचीनां
    पत्राङ्कुराणि विलिखन्ति पयोधरेषु ॥ **12.8** ॥

निर्वर्तयन्ति तव ये निचितानि पुष्पैः
    वैहारिकाण्युपवनानि वसुन्धरायाम्।
कालेन ते कमललोचनपादरक्षे !
    क्रीडन्ति नन्दनवने कृतिनः पुमांसः ॥ **12.9** ॥

अर्चन्ति ये मधुभिदो मणिपादरक्षे !
    भावात्मकैरपि परं भवतीं प्रसूनैः।
मन्दारदामसुभगैर्मकुटैरजस्रं
    बृन्दारकाः सुरभयन्ति पदं तदीयम् ॥ **12.10** ॥

अस्पृष्टदोषपरिमर्शमलङ्घ्यमन्यैः
    हस्तापचेयमखिलं पुरुषार्थवर्गम्।

चित्रं जनार्दनपदावनि ! साधकानां
    त्वय्यर्पिताः सुमनसः सहसा फलन्ति ॥ **12.11** ॥

वन्दारुभिः सुरगणैस्त्वयि सम्प्रयुक्ता
    माला विभाति मधुसूदनपादरक्षे !।
विक्रान्तविष्णुपदसंश्रयबद्धसख्या
    भागीरथीव परिरम्भणकाङ्क्षिणी ते ॥ **12.12** ॥

ये नाम रङ्गनृपतेर्मणिपादुके ! त्वाम्
    अभ्यर्चयन्ति कमलैरधिकर्तुकामाः।
आरोपयत्यवहिता नियतिः क्रमात्तान्
    कल्पान्तरीयकमलासनपत्रिकासु ॥ **12.13** ॥

त्वय्यर्पितानि मनुजैर्मणिपादरक्षे !
    दूर्वाङ्कुराणि सुलभान्यथवा तुलस्यः।
साराधिकाः सपदि रङ्गनरेन्द्रशक्त्या
    संसारनागदमनौषधयो भवन्ति ॥ **12.14** ॥

आराध्य नूनमसुरार्दनपादुके ! त्वाम्
    आमुष्मिकाय विभवाय सहस्रपत्रैः।
मन्वन्तरेषु परिवर्तिषु देवि ! मर्त्याः
    पर्यायतः परिणमन्ति सहस्रनेत्राः ॥ **12.15** ॥

धन्यैस्त्वयि त्रिदशरक्षकपादरक्षे !
    पुष्पाणि काञ्चनमयानि समर्पितानि।
विस्रंसिना विनमतो गिरिशोत्तमाङ्गात्
    आरग्वधेन मिलितान्यपृथग्भवन्ति ॥ **12.16** ॥

विश्वोपसर्गशमनं त्वयि मन्यमानैः
    वैमानिकैः प्रणिहितं मणिपादरक्षे !।

पद्मासहायपदपद्मनखार्चिषस्ते
    पुष्पोपहारविभवं पुनरुक्तयन्ति ॥ **12.17** ॥

नाकौकसां शमयितुं परिपन्थिवर्गान्
    नाथे पदं त्वयि निवेशयितुं प्रवृत्ते।
त्वत्संश्रितां विजहतस्तुळसीं वमन्ति
    प्रस्थानकाहळरवान् प्रथमं द्विरेफाः ॥ **12.18** ॥

रङ्गेशपादपरिभोगसुजातगन्धां
    सम्प्राप्य देवि ! भवतीं सह दिव्यपुष्पैः।
नित्योपदर्शितरसं न किलाद्रियन्ते
    नाभीसरोजमपि नन्दनचञ्चरीकाः ॥ **12.19** ॥

प्रागेव काञ्चनपदावनि ! पुष्पवर्षात्
    संवर्तिते शमितदैत्यभयैः सुरेन्द्रैः।
पद्मेक्षणस्य पदपद्मनिवेशलाभे
    पुष्पाभिषेकमुचितं प्रतिपद्यसे त्वम् ॥ **12.20** ॥

दिशि दिशि मुनिपत्न्यो दण्डकारण्यभागे
    न जहति बहुमानान्नूनमद्यापि मूलम्।
रघुपतिपदरक्षे ! त्वत्परिष्कारहेतोः
    अपचितकुसुमानामाश्रमानोकहानाम् ॥ **12.21** ॥

घटयसि परिपूर्णान् कृष्णमेघप्रचारे
    कृतिभिरुपहितैस्त्वं केतकीगर्भपात्रैः।
वरतनुपरिणामाद्धामतः श्यामळानां
    प्रणतिसमयलग्नान् पादुके ! मौळिचन्द्रान् ॥ **12.22** ॥

परिचरणनियुक्तैः पादुके ! रङ्गभर्तुः
    पवनतनयमुख्यैरर्पितां त्वत्समीपे।

विनतविधिमुखेभ्यो निर्विशेषां द्विरेफाः
    कथमपि विभजन्ते काञ्चनीं पद्मपङ्क्तिम् ॥ **12.23** ॥

विधिशिवपुरुहूतस्पर्शितैर्दिव्यपुष्पैः
    त्वयि सह निपतन्तस्तत्तदुद्यानभृङ्गाः।
मधुरिपुपदरक्षे ! मञ्जुभिः स्वैर्निनादैः
    अविदितपरमार्थान् नूनमध्यापयन्ति ॥ **12.24** ॥

प्रशमयति जनानां सञ्ज्वरं रङ्गभर्तुः
    परिसरचलितानां पादुके ! चामराणाम्।
अनुदिनमुपयातैरुत्थितं दिव्यपुष्पैः
    निगमपरिमळं ते निर्विशन् गन्धवाहः ॥ **12.25** ॥

अखिलभुवनरक्षानाटिकां दर्शयिष्यन्
    अनिमिषतरुपुष्पैरर्चिते रङ्गमध्ये।
अभिनयमनुरूपं शिक्षयत्यात्मना त्वां
    प्रथमविहितलास्यः पादुके ! रङ्गनाथः ॥ **12.26** ॥

अगळितनिजरागां देवि ! विष्णोः पदं तत्
    त्रिभुवनमहनीयां प्राप्य सन्ध्यामिव त्वाम्।
भवति विबुधमुक्तैः स्पष्टतारानुषङ्गं
    परिसरपतितैस्ते पारिजातप्रसूनैः ॥ **12.27** ॥

व्यञ्जन्त्येते विभवमनघं रञ्जयन्तः श्रुतीर्नः
    प्राध्वं रङ्गक्षितिपतिपदं पादुके ! धारयन्त्याः।
नादैरन्तर्निहितनिगमैर्नन्दनोद्यानभृङ्गाः
    दिव्यैः पुष्पैः स्नपितवपुषो देवि ! सौस्नातिकास्ते ॥ **12.28** ॥

किं पुष्पैस्तुळसीदळैरपि कृतं दूर्वाऽपि दूरे स्थिता
    त्वत्पूजासु मुकुन्दपादु ! कृपया त्वं कामधेनुः सताम्।

प्रत्यग्राहृतदर्भपल्लवलवग्रासाभिलाषोन्मुखी
धेनुस्तिष्ठतु सा वसिष्ठभवनद्वारोपकण्ठस्थले ॥ **12.29** ॥

चूडारग्वधरजसा चूर्णस्नपनं विधाय ते पूर्वम्।
रङ्गेशपादुके ! त्वाम् अभिषिञ्चति मौळिगङ्गया शम्भुः ॥ **12.30** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे पुष्पपद्धतिः द्वादशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥